श्री कनकधारा स्तोत्रं

श्री कनकधारा स्तोत्रं

वंदे वंदारु मंदारमिंदिरानंदकंदलं |
अमंदानंदसंदोह बंधुरं सिंधुराननं ||

अंगं हरेः पुलकभूषणमाश्रयंती
भृंगांगनेव मुकुळाभरणं तमालं |
अंगीकृताखिलविभूतिरपांगलीला
मांगळ्यदास्तु मम मंगळदेवतायाः || 1 ||

मुग्धा मुहुर्विदधती वदने मुरारेः
प्रेमत्रपाप्रणिहितानि गतागतानि |
मालादृशोर्मधुकरीव महोत्पले या
सा मे श्रियं दिशतु सागरसंभवायाः || 2 ||

विश्वामरेंद्रपदविभ्रमदानदक्ष-
-मानंदहेतुरधिकं मुरविद्विषोऽपि |
ईषन्निषीदतु मयि क्षणमीक्षणार्थ-
-मिंदीवरोदरसहोदरमिंदिरायाः || 3 ||

आमीलिताक्षमधिगम्य मुदा मुकुंद-
-मानंदकंदमनिमेषमनंगतंत्रं |
आकेकरस्थितकनीनिकपक्ष्मनेत्रं
भूत्यै भवेन्मम भुजंगशयांगनायाः || 4 ||

बाह्वंतरे मुरजितः श्रितकौस्तुभे या
हारावळीव हरिनीलमयी विभाति |
कामप्रदा भगवतोऽपि कटाक्षमाला
कळ्याणमावहतु मे कमलालयायाः || 5 ||

कालांबुदाळिललितोरसि कैटभारे-
-र्धाराधरे स्फुरति या तटिदंगनेव |
मातुस्समस्तजगतां महनीयमूर्तिः
भद्राणि मे दिशतु भार्गवनंदनायाः || 6 ||

प्राप्तं पदं प्रथमतः खलु यत्प्रभावात्
मांगल्यभाजि मधुमाथिनि मन्मथेन |
मय्यापतेत्तदिह मंथरमीक्षणार्धं
मंदालसं च मकरालयकन्यकायाः || 7 ||

दद्याद्दयानुपवदो द्रविणांबुधारा-
-मस्मिन्न किंचन विहंगशिशौ विषण्णे |
दुष्कर्मघर्ममपनीय चिराय दूरं
नारायणप्रणयिनीनयनांबुवाहः || 8 ||

इष्टा विशिष्टमतयोऽपि यया दयार्द्र
दृष्ट्या त्रिविष्टपपदं सुलभं वचंते |
दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां
पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः || 9 ||

गीर्देवतेति गरुडध्वजसुंदरीति
शाकंभरीति शशिशेखरवल्लभेति |
सृष्टिस्थितिप्रळयकेळिषु संस्थितायै
तस्मै नमस्त्रिभुवनैकगुरोस्तरुण्यै || 10 ||

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै
रत्यै नमोऽस्तु रमणीयगुणार्णवायै |
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै
पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै || 11 ||

नमोऽस्तु नाळीकनिभाननायै
नमोऽस्तु दुग्धोदधिजन्मभूम्यै |
नमोऽस्तु सोमामृतसोदरायै
नमोऽस्तु नारायणवल्लभायै || 12 ||

नमोऽस्तु हेमांबुजपीठिकायै
नमोऽस्तु भूमंडलनायिकायै |
नमोऽस्तु देवादिदयापरायै
नमोऽस्तु शार्ङ्गायुधवल्लभायै || 13 ||

नमोऽस्तु देव्यै भृगुनंदनायै
नमोऽस्तु विष्णोरुरसिस्थितायै |
नमोऽस्तु लक्ष्म्यै कमलालयायै
नमोऽस्तु दामोदरवल्लभायै || 14 ||

नमोऽस्तु कांत्यै कमलेक्षणायै
नमोऽस्तु भूत्यै भुवनप्रसूत्यै |
नमोऽस्तु देवादिभिरर्चितायै
नमोऽस्तु नंदात्मजवल्लभायै || 15 ||

संपत्कराणि सकलेंद्रियनंदनानि
साम्राज्यदानविभवानि सरोरुहाक्षि |
त्वद्वंदनानि दुरिताहरणोद्यतानि
मामेव मातरनिशं कलयस्तु मान्ये || 16 ||

यत्कटाक्षसमुपासनाविधिः
सेवकस्य सकलार्थसंपदः |
संतनोति वचनांगमानसै-
-स्त्वां मुरारिहृदयेश्वरीं भजे || 17 ||

सरसिजनिलये सरोजहस्ते
धवळतमांशुकगंधमाल्यशोभे |
भगवति हरिवल्लभे मनोज्ञे
त्रिभुवनभूतिकरि प्रसीद मह्यं || 18 ||

दिग्घस्तिभिः कनककुंभमुखावसृष्ट-
-स्वर्वाहिनीविमलचारुजलप्लुतांगीं |
प्रातर्नमामि जगतां जननीमशेष-
-लोकाधिनाथगृहिणीममृताब्धिपुत्रीं || 19 ||

कमले कमलाक्षवल्लभे त्वं
करुणापूरतरंगितैरपांगैः |
अवलोकय मामकिंचनानां
प्रथमं पात्रमकृत्रिमं दयायाः || 20 ||

स्तुवंति ये स्तुतिभिरमूभिरन्वहं
त्रयीमयीं त्रिभुवनमातरं रमां |
गुणाधिका गुरुतरभाग्यभाजिनो
भवंति ते भुवि बुधभाविताशयाः || 21 ||

इति श्री कनकधारास्तोत्रं यच्छंकराचार्य निर्मितं
त्रिसंध्यं यःपथेन्नित्यं स कुबेरसमोभवेत् |